५ ततः मृत्तिकया विलिप्य अपानद्वारं जलेन प्रमृज्यात् ।	५ पीछे मिट्टीसे लेपन कर अपानद्वारको जलसे धोवे ।
६ अनन्तरं हस्तौ पादौ प्रक्षाल्य दन्तधावनमाचरेत् ।	६ पीछे हाथों [और] पैरोंको धोकर दंतशुद्धि करे ।

७ एवं मुखशोधनं गण्डूषैः कुर्वीत ।

८ यावत् मुखशोधनं न भवति तावत् केनापि समं न ब्रूयात् ।

९ तदनन्तरं नद्यां तडागे कूपे वा शीतजलेन स्नायात् ।

१० अशक्तौ तु उष्णोदकेन स्नातव्यम् ।

११ ततः परं धौतवस्त्रं परिदधीत ।

१२ पश्चात् ललाटे भस्म गोपीचन्दनं वा धरेत् ।

१३ प्रातःसंध्यां च उपासीत ।

१४ षोडशोपचारैः देवपूजां कुर्वीत ।

१५ ततः देवतर्पणं ऋषितर्पणं च कार्यम् ।

१६ पितृमरणानन्तरं पितृतर्पणमपि करणीयम् ।

१७ पाके निष्पन्ने वैश्वदेवं विदध्यात् ।

१८ आगतान् अतिथीन् समर्चयेत् ।

१९ समनन्तरं देवताभ्यः पक्वान्नसमर्पणं कुर्यात् ।

७ इस प्रकार कुल्लोंसे मुखशुद्धि करे ।

८ जबतक मुँहकी शुद्धि नहीं हो तबतक किसीके साथ नहीं बोले ।

९ तिसके पीछे नदीपर [या] तालावपर या कुएंपर ठंढे जलसे स्नान करे ।

१० शक्ति न हो तो गरम पानीसे स्नान करे ।

११ उसके पीछे धोये हुए कपडेको पहिरे ।

१२ पीछे भालपर भस्म या गोपीचंदनको लगावे ।

१३ और प्रातःसंध्याकी उपासना करे ।

१४ सोलह उपचारोंसे देवतापूजन करे ।

१५ पीछे देवताओंका तर्पण और ऋषियोंका तर्पण करना.

१६ पिता मरनेपर पितरोंकाभी तर्पण करना ।

१७ रसोई सिद्ध होनेपर वैश्वदेव करे ।

१८ आये हुए अतिथियोंका पूजन करे ।

१९ पीछे देवताओंको पके हुए अन्नका समर्पण करे ।

२० ततः स्वपरिवारेण सहितः चतुर्विधम् अन्नं भुञ्जीत ।

२१ भोजनानन्तरं पाणी मुखं पादौ च प्रक्षाल्य आचामेत् ।

२२ अतिथिभ्यः ताम्बूलं दत्त्वा स्वयं भक्षयेत् ।

२३ एवं सायमपि सन्ध्यां देवस्य पंचोपचारपूजां च विधाय भुञ्ज्यात् ।

२४ दिवा द्विवारं न अभ्यवहरेत् ।

२५ दिवा स्त्रीसङ्गः शास्त्रे निषिद्धः ।

२६ इति शिष्टानां प्रक्रिया प्रचलति ।

२७ एवं सामान्यकृत्यस्य उपदेशः समाप्तः ।

२० अनंतर अपने परिवारके सहित चार प्रकारके अन्नको खावे ।

२१ भोजन होनेके पीछे हाथों, मुख और पांवोंको धोकर आचमन करे ।

२२ अतिथियोंको तांबूल दे आप भक्षण करे ।

२३ इस प्रकार सांझमेंभी संध्या और देवकी पंचोपचार पूजा कर भोजन करे ।

२४ दिनमें दो बार भोजन नहीं करे ।

२५ दिनमें स्त्रीका संग शास्त्रमें निषिद्ध है ।

२६ ऐसी शिष्टोंकी रीति चलती है ।

२७ ऐसा साधारण कर्मोंका उपदेश समाप्त हुआ ।

स्वभावोपदेशः २.

संस्कृत.	हिंदी.
१ गुरुः शिष्यान् पाठयति ।	१ गुरु शिष्योंको पढाता है ।
२ छात्राः अभ्यस्यन्ति ।	२ विद्यार्थी अभ्यास करते हैं।
३ पान्थो याति ।	३ बटोही जाता है ।
४ वेत्रधराः स्तेनं गवेषयन्ति ।	४ पोलीस सिपाही चोरको खोजते हैं ।
५ वादी अभ्यर्थनां करोति ।	५ वादी अर्ज करता है ।

६ प्रतिवादी भूते मतसमर्थकम्।	६ प्रतिवादी वकीलको बोलता है।
७ अधिकरणं प्रति यात।	७ कचहरीको चलो।
८ मम पक्षः अवश्यं समर्थ्यताम्।	८ मेरा पक्ष जरूर प्रतिपादन करना।
९ अभ्यर्थनायाः इयं प्रतिच्छायास्ति।	९ अरजकी यह नकल है।
१० न्यायाधीशः न्यायं करोति।	१० इनसाफ करनेवाला इनसाफ करता है।
११ साक्षिणः पृच्छति।	११ गवाही देनेवालोंको प्रश्न करता है।
१२ निर्णयं कथयति।	१२ फैसला कहता है।
१३ स्तेनं बध्नन्ति।	१३ चोरको बांधते हैं।
१४ तं च कारागृहे स्थापयन्ति।	१४ उसको कैदखानेमें रखते हैं।
१५ साधवः उपकुर्वते।	१५ साधु [लोग] उपकार करते हैं।
१६ दुष्टाः प्राणिनः हिंसन्ति।	१६ दुष्ट [लोग] प्राणियोंको घायल करते हैं।
१७ नर्मकथाभिः तुष्यति राजा।	१७ ठट्ठाकी बातोंसे राजा खुश होता है।
१८ पादाभ्यां गच्छति।	१८ पैरोंसे जाता है।
१९ वाचा वदति।	१९ वाणीसे बोलता है।
२० हस्तेन भुंक्ते।	२० हाथसे जेमता है।
२१ नेत्राभ्यां पश्यति।	२१ आखोंसे देखता है।
२२ कर्णाभ्यां शृणोति।	२२ कानोंसे सुनता है।
२३ त्वचा स्पृशति।	२३ त्वचासे स्पर्श करता है।
२४ नासिकया जिघ्रति।	२४ नाकसे सूंघता है।
२५ जिह्वया लेढि।	२५ जीभसे चाटता है।

२६ धीरो धैर्यं न मुञ्चति ।	२६ विद्वान् धैर्यको नहीं छोडता।
२७ धनिकः व्यापारं कुरुते ।	२७ द्रव्यवान् (सेठ) व्यापार करता है ।
२८ व्यापारेण लक्ष्मीः वर्धते ।	२८ व्यापारसे लक्ष्मी बढती है।
२९ भृत्यः वेतनं गृह्णाति ।	२९ टहलुआ (नौकर) पगार (मजूरी) लेता है ।
३० विद्यया विनय उत्पद्यते ।	३० विद्यासे विनय उत्पन्न होता है ।
३१ विनयेन महत्त्वं जायते ।	३१ विनयसे बडापन होता है।
३२ महत्त्वेन धनं लभते ।	३२ बडेपनसे द्रव्यको प्राप्त होता है ।
३३ धनेन सर्वं सिद्ध्यति ।	३३ धनसे सब सिद्ध होता है ।
३४ सुवर्णकारः अलंकारान्निर्मिमीते ।	३४ सुनार गहनोंको बनाता है।
३५ उद्योगिनः यतन्ते ।	३५ धंधेवाले (लोग) प्रयत्न करते हैं ।
३६ प्रतिदिनं भुंक्ते ।	३६ दिन दिन जेमता है ।
३७ वृक्षान् सिञ्चति मालाकारः।	३७ पेडोंको माली सींचता है ।
३८ रथकारः गेहं रचयति ।	३८ बढई घरको बनाता है ।
३९ चित्रकारः भित्तौ आलेख्यानि आलिखत् ।	३९ चितेरा भींतपर तसबीरोंको लिखता (खींचता) मया।
४० कुम्भकारो मृत्तिकां मर्दयति।	४० कुम्हार मिट्टीको कूटता है ।
४१ आदित्यः उदयति ।	४१ सूर्य उगता है ।
४२ प्रकाशेन तमः ध्वंसते ।	४२ रौशनी (तेज) से अंधेरा नष्ठ होता है ।
४३ शुक्लपक्षे निशाकरः विवर्द्धते।	४३ शुक्लपक्षमें चांद बढता है ।
४४ कृष्णपक्षे क्षिणोति ।	४४ कृष्णपक्षमें क्षीण (कम) होता है ।

४५ मेघो वर्षति ।
४६ वातो वहति ।
४७ जलं नीचैः गच्छति ।
४८ राजानो युध्यन्ते ।
४९ कुविन्दः अंशुकानि वयते ।
५० चन्द्रमसः उदयकाले अस्तकाले च समुद्रो विवर्धते ।
५१ तुन्दिलः स्वपिति ।

५२ खगाः उड्डीय अटन्ति ।
५३ गोपालाः गाः रक्षन्ति ।

५४ अर्भकाः रुदन्ति ।
५५ शुकः फलम् अत्ति ।
५६ द्विजाः संध्याम् उपासते ।

५७ हस्ती अङ्गानि कण्डूयते ।
५८ पश्य मृगो धावति ।
५९ कथिकाः कथाम् उपदिशन्ति ।
६० शस्त्रेण च्छिनत्ति ।
६१ नागदन्तकोपर्युष्णीषं निदधाति ।
६२ आदर्शे प्रतिबिम्बं दृश्यते ।
६३ मार्जारो मूषकेण सह स्पर्धते ।
६४ इति स्वभावोपदेशः समाप्तः ।

४५ बादल बरसता है ।
४६ वायु वहता है ।
४७ जल नीचे जाता है ।
४८ राजा [लोग] लडते हैं ।
४९ जुलाहा कपडोंको बुनता है।
५० चांदके उगनेके समय और अस्तके समय दर्या बढता है।
५१ त्वँदार (बडे पेटवाला) सोता है ।
५२ पच्छी उडके फिरते हैं ।
५३ अहीर गौओंका रक्षण करते हैं ।
५४ लडके रोते हैं ।
५५ तोता फलको खाता है ।
५६ ब्राह्मण संध्याको उपासते (करते) हैं ।
५७ हाथी अंगोंको खुजाता है।
५८ देख, हरिण दौडता है ।
५९ कहानी कहनेवाले कहानी कहते हैं ।
६० हथियारसे काटता है ।
६१ खूंटापर पगडीको रखता है।
६२ ऐनेमें प्रतिबिंब दीखता है।
६३ बिल्ली चूहेके साथ स्पर्धा करती है । [समाप्त ।
६४ इस प्रकार स्वभावका उपदेश

विद्यार्थिसंवादोपदेशः ३.

संस्कृत.	हिंदी.
१ एतावत्कालं गृहे एव त्वं किं करोषि ?	१ इतने कालतक घरमेंही तू क्या करता है ?
२ दश वादिताः केरलाः ।	२ दस घंटे बजे ।
३ झटिति बहिः निर्गच्छ ।	३ झट बाहिर निकल ।
४ अद्य विलम्बो भविष्यति ।	४ आज देर होगी ।
५ अहं तु गच्छामि ।	५ मैं तो जाता हूं ।
६ अहमपि आगच्छामि ।	६ मैंभी आता हूं ।
७ भोजनादिकं मम सर्वं कर्म संवृत्तमस्ति ।	७ भोजन आदिक मेरा सब काम हुआ है ।
८ सर्वम् उपकरणं गृहीत्वा आगतोऽहं, संप्रति शीघ्रं गच्छ ।	८ सब सामग्री लेके मैं आया, अब जलदी चल ।
९ चतुष्पथे कोऽयं स्थितः ?	९ चौहटेपर यह कौन रहा है ?
१० अरे भानुदत्त, तवापि अद्य कुतः विलम्बोऽभूत् ?	१० अरे भानुदत्त ! तुझेभी आज क्यों देर हुई ?
११ अद्य गुरुः अस्मान् ताडयिष्यति ।	११ आज गुरु हमको मारेगा ।
१२ मया अभ्यासोऽपि न अकारि ।	१२ मैंने अभ्यासभी नहीं किया है ।
१३ त्वया अभ्यासः कृतः कश्चित् ?	१३ तूने अभ्यास किया क्या ?
१४ मम पाठस्तु दृढः समभवत् ।	१४ मेरा पाठ तो दृढ हुआ है ।
१५ अद्य भवन्तम् उपदिशामि ।	१५ आज तुझे उपदेश करता हूं ।
१६ प्रतिदिनं अभ्यासः कार्यः ।	१६ दर रोज अभ्यास करना चाहिये ।

१७ तेन ते विद्या सज्जा भविष्यति ।	१७ तिससे तेरी विद्या तैयार होगी ।
१८ गुरुसेवां विना विद्या सम्यक् न सिध्यति ।	१८ गुरुकी सेवाके विना उत्तम रीतिसे विद्या सिद्ध नहीं होती ।
१९ तस्मात् भक्त्याऽवश्यं गुरुं सेवेत ।	१९ इससे भक्ति करके अवश्य गुरुको सेवे ।
२० विद्ययापि विद्या भवति ।	२० विद्यासेभी विद्या होती है ।
२१ पुष्कलेन धनेन वा ।	२१ किंवा बहुत द्रव्यसे ।
२२ वयं तु अकिंचनाः स्मः ।	२२ हम तो दरिद्री हैं ।
२३ पाठादानकाले निरर्थकं न वदेत् ।	२३ पाठ लेनेके समय व्यर्थ नहीं बोले ।
२४ गुरोः भाषणं सावधानं शृणुयात् ।	२४ गुरुका बोलना अवधानसहित सुने ।
२५ गुरुं न निन्देत् ।	२५ गुरुकी निंदा न करे ।
२६ गुरौ प्रसन्ने न किमपि दुर्लभम् ।	२६ गुरु संतुष्ट होनेपर कुछभी दुर्लभ नहीं ।
२७ विद्वांसं राजापि मानयति ।	२७ विद्वान्को राजाभी मान देता है ।
२८ मत्संनिधौ मषीपात्रं वर्तते परंतु लेखनी न विद्यते ।	२८ मेरे पास दावात तो है पर कलम नहीं है ।
२९ तव पंचमं पुस्तकं क्व वर्तते ?	२९ तेरी पांचवीं पुस्तक कहां है ?
३० देहि मह्यं क्षुरप्रिकां कर्तरीं च ।	३० मुझे चक्कू और कतरनी दे ।
३१ परश्वः त्वद्गृहम् आगन्ताऽस्मि ।	३१ परसोंके दिन तेरे घरको मैं आऊंगा ।
३२ अग्रिमे वाराष्टके परीक्षा भवेत् ।	३२ आइंदे हफ्तेमें परीक्षा होगी ।

३३ परीक्षायां दक्षतया स्थातव्यम् ।	३३ परीक्षामें चतुरपनसे रहना ।
३४ कदापि न भेतव्यम् ।	३४ कभी नहीं डरना ।
३५ विचारं कृत्वा, प्रश्नोत्तरं लेखनीयम् ।	३५ विचार करके प्रश्नका उत्तर लिखना ।
३६ त्वं परीक्षायामुत्तीर्णो भविष्यसि ।	३६ तू परीक्षामें पास होगा ।
३७ पञ्चमकक्षायां काठिन्यं न किमपि ।	३७ पांचवीं इयत्तामें कुछभी कठिनपन नहीं ।
३८ शालाव्यवस्थापकः स्वयमेव परीक्षायै आगमिष्यति, इति मया श्रुतम् ।	३८ शालाकी व्यवस्था करनेवाला (इन्स्पेक्टर) आपही परीक्षाके लिये आवेगा, ऐसा मैंने सुना [है] ।
३९ अयं यष्टिधरः कुत आगच्छति ?	३९ यह सिपाही कहांसे आता है ?
४० किमरे, उद्घाटिता शाला ?	४० क्यों रे, शाला खोली ?
४१ केनचित् कारणेन अद्य अधिकारिणा विरामः अदायि ।	४१ किसी कारणसे आज अधिकारीने रजा दी है ।
४२ अतः उद्घाटय पुनः मया पिहिता ।	४२ इसीसे खोलकर फिर मैंने मूंदी ।
४३ तस्मात् निवर्तध्वं यूयम् ।	४३ इस कारण तुम लौटो ।
४४ इयं मदीया उपानत् छिन्ना वर्तते ।	४४ यह मेरा जूता (जोडा) फटा है ।
४५ कदा अन्या क्रेतव्या ?	४५ कब दूसरा खरीदना ?
४६ अद्यतनः एव दिवसो योग्यः ।	४६ आजकाही दिन योग्य है ।
४७ चर्मकारगृहं समीपमेव अस्ति ।	४७ चमारका घर पासही है ।

४८ इदं मम पुस्तकं पटमञ्जूषिकायां निधेहि ।	४८ यह मेरा पुस्तक पाकिटमें रख ।
४९ सायं गणितोदाहरणाचिन्तनाय अवश्यमू आयाहि ।	४९ सायंकालमें गणितके उदाहरणके सोचनके अर्थ अवश्य आ ।
५० इति विद्यार्थिसंवादोपदेशः समाप्तः ।	५० इस प्रकार विद्यार्थियोंके संवादका उपदेश समाप्त हुआ ।

दिगुपदेशः ४.

संस्कृत.	हिंदी.
१ उदयाचलसंनिहिता या दिक् सा पूर्वा इति उच्यते ।	१ उदयपर्वतके पास होनेवाली जो दिशा सो पूर्व ऐसा कहा जाता है ।
२ तस्याः अधिपः इन्द्रः ।	२ उसका मालिक इंद्र [है] ।
३ तत्रैव ऐरावतो नाम गजः तिष्ठति ।	३ तहांही ऐरावत नामका हाथी रहाता है ।
४ अस्ताचलसंनिहिता या दिशा सा पश्चिमा ।	४ अस्ताचलके पास होनेवाली जो दिशा सो पश्चिम ।
५ तस्याः राजा वरुणः ।	५ उसका राजा वरुण [है] ।
६ तस्याम् अञ्जननामा हस्ती वसति ।	६ तहां अंजन नामका हाथी रहता है ।
७ मेरोः समीपस्था काष्ठा उत्तरा ।	७ मेरुके पास होनेवाली दिशा उत्तर ।
८ तस्याः राजा धनदः ।	८ उसका मालिक कुबेर [है] ।
९ तस्यां सार्वभौमाभिधेयः दन्ती वर्तते ।	९ तहां सार्वभौम नामवाला हाथी रहता है ।

१० मेरोः व्यवहिता या आशा सा दक्षिणा ।

११ तस्यां धर्मराजः राज्यं करोति ।

१२ तत्रैव वामननामकः करी निवसति ।

१३ दक्षिणपूर्वयोः मध्यगता ककुप् आग्नेयी इति अभिदधते ।

१४ तस्याः राजा अग्निः ।

१५ पुण्डरीकेण हस्तिना सा दिक् अधिष्ठिता ।

१६ दक्षिणपश्चिमयोर्मध्ये वर्तमाना दिक् नैर्ऋती ।

१७ तां निर्ऋतिनामा निशाचरः पालयति ।

१८ कुमुदनामा हस्ती तत्र प्रतिवसति ।

१९ पश्चिमोत्तरयोः मध्यस्थायाः दिशः नाम वायवी इति अस्ति ।

२० तस्याः आधिपत्यं वायुना स्वीकृतम् ।

२१ पुष्पदन्तः तत्र स्थितः ।

२२ पूर्वोत्तरयोः मध्ये भवा दिक् ऐशानी इति अभिधीयते ।

१० मेरुसे व्यवहित (व्यवधानसहित, दूर) जो दिशा सो दक्षिण ।

११ तहां यम राज्य करता है ।

१२ तहांही वामन नामवाला हाथी रहता है ।

१३ दक्षिण पूर्वके बीचमें होनेवाली दिशा आग्नेयी, इस प्रकार कहते हैं ।

१४ उसका मालिक अग्नि [है]।

१५ पुण्डरीक हाथीने वह दिशा अधिष्ठित (स्थान की) है।

१६ दक्षिण पश्चिमके बीचमें रहनेवाली दिशा नैर्ऋती(है)।

१७ उसको निर्ऋति नामका राक्षस पालता है ।

१८ कुमुद नामक हाथी तहां रहता है ।

१९ पश्चिम उत्तरके बीच होनेवाली दिशाका नाम वायवी ऐसा है ।

२० उसका मालिकपन वायुने स्वाधीन रखा है ।

२१ तहां पुष्पदंत(हाथी)रहा है।

२२ पूर्व-उत्तरके बीचमें होनेवाली दिशा ऐशानी ऐसी कहलाती है ।

२३ तस्याः अधिपस्य नाम ईशानः इति प्रसिद्धम् अस्ति।
२४ तस्यां वर्तमानस्य गजस्य नाम सुप्रतीकः।
२५ एते एव अष्टौ दिग्गजाः सन्ति।
२६ उपरिभवा दिक् ऊर्ध्वदिशा इति कथ्यते।
२७ तस्याः अधिपतिः ब्रह्मा।
२८ अधोभूतायाः दिशः नाम अधरदिशा इति।
२९ ताम् अनन्तः रक्षति।
३० एता एव दश दिशाः सन्ति।
३१ द्विजाः सन्ध्याकाले दश दिशः नमस्कुर्वन्ति।
३२ पूर्वाभिमुखः अथवोत्तराभिमुखः पूजादि शुभकृत्यं कुर्यात्।
३३ अस्य यदि असंभवः स्यात्तदैशान्यभिमुखः शुभकर्म समाचरेत्।
३४ इतराः सर्वदिशाः निन्द्याः कथिताः।
३५ विशेषतः दक्षिणा पश्चिमा च मङ्गलकर्मणि निन्दिते स्तः।

२३ उसके मालिकका नाम ईशान ऐसा प्रसिद्ध है।
२४ तहां रहनेवाले हाथीका नाम सुप्रतीक (है)।
२५ येही आठ दिशाओंके हाथी हैं।
२६ ऊपर होनेवाली दिशा ऊर्ध्व-दिशा ऐसा कहा जाता है।
२७ उसका राजा ब्रह्मदेव।
२८ नीचे होनेवाली दिशाका नाम अधरादिशा ऐसा [है]।
२९ उसको शेष पालता है।
३० येही दश दिशायें हैं।
३१ ब्राह्मण संध्याके समय दश दिशाओंको नमस्कार करते हैं।
३२ पूर्वके संमुख या उत्तरके संमुख [हो] पूजा आदि मंगल कार्य करे।
३३ इसका यदि संभव न होवे तो ऐशानीदिशाके संमुख [होके] सत्कर्म करे।
३४ अन्य सब दिशायें निंद्य कही गई हैं।
३५ विशेष करके दक्षिण और पश्चिम शुभकार्यके विषे निंदित हैं।

३६ दक्षिणस्यां दीपस्य मुखं न कार्यम् ।	३६ दक्षिण दिशाकी ओर दीया-का मुँह नहीं करना ।
३७ दक्षिणस्यां पादौ कृत्वा न शयीत ।	३७ दक्षिणकी ओर पैरोंको कर नहीं सोवे ।
३८ एवं दिशामुपदेशः समाप्तः अभूत्	३८ इस प्रकार दिशाओंका उप-देश समाप्त हुआ ।

कालोपदेशः ५.

संस्कृत.	हिंदी.
१ अष्टादशाभिः निमेषैः एका काष्ठा भवति ।	१ अठारह निमेषों (पलक मारने) से एक काष्ठा होती है ।
२ त्रिंशत्काष्ठाभिः कला जायते।	२ तीस काष्ठाओंसे कला होती है ।
३ त्रिंशत्कलाभिः क्षणः संपद्यते ।	३ तीस कलाओंसे क्षण होता है ।
४ द्वादशभिः क्षणैः एको मुहूर्तः ।	४ बारह क्षणोंसे एक मुहूर्त [होता है] ।
५ एवं षष्ट्या पलैः एका घटिका निष्पद्यते ।	५ इस प्रकार साठ पलोंसे एक घटिका होती है ।
६ द्वाभ्यां घटिकाभ्याम् एको मुहूर्तः ।	६ दो घटिकाओंसे एक मुहूर्त ।
७ त्रिंशन्मुहूर्तैः एकः अहोरात्रः ।	७ तीस मुहूर्तोंसे एक अहोरात्र ।
८ अष्टभिः अहोरात्रैः एकं वाराष्टकम् ।	८ आठ अहोरात्रोंसे एक हफ्ता ।
९ द्वाभ्यां वाराष्टकाभ्यामेकः पक्षः ।	९ दो हफ्तोंसे एक पखवाडा ।

१० द्वाभ्यां पक्षाभ्याम् एको मासः ।	१० दो पखवाडोंसे एक महीना ।
११ द्वाभ्यां मासाभ्याम् एकः ऋतुः ।	११ दो महीनोंसे एक ऋतु ।
१२ त्रिभिः ऋतुभिः एकमयनम् ।	१२ तीन ऋतुओंसे एक अयन [होता है] ।
१३ द्वाभ्यामयनाभ्यां वर्षं जायते ।	१३ दो अयनोंसे बरस होता है ।
१४ मासाः द्वादश सन्ति ।	१४ महीने बारह हैं ।
१५ चैत्रः १, वैशाखः २, ज्येष्ठः ३, आषाढः ४, श्रावणः ५, भाद्रपदः ६, आश्विनः ७, कार्तिकः ८, मार्गशीर्षः ९, पौषः १०, माघः ११, फाल्गुनः १२, इति तु तेषां क्रमः ।	१५ चैत्र १, वैशाख २, ज्येष्ठ ३, आषाढ ४, श्रावण ५, भाद्रपद ६, आश्विन ७, कार्तिक ८, मार्गशीर्ष ९, पौष १०, माघ ११, फाल्गुन १२, ऐसा तो उनका क्रम [है] ।
१६ ऋतवः षट् विद्यन्ते ।	१६ ऋतु छः हैं ।
१७ चैत्रवैशाखौ वसन्तर्तुः १, ज्येष्ठाषाढौ ग्रीष्मः २, श्रावणभाद्रपदौ वर्षा ३, आश्विनकार्तिकौ शरत् ४, मार्गशीर्षपौषौ हेमंतः ५, माघफाल्गुनौ शिशिरऋतुः ६ ।	१७ चैत्र वैशाख-वसंतऋतु १, ज्येष्ठ आषाढ-ग्रीष्म २, श्रावण भाद्रपद-वर्षा ३, आश्विन कार्तिक-शरत् ४, मार्गशीर्ष पौष-हेमंत ५, माघ फाल्गुन-शिशिरऋतु ६।
१८ वाराः सप्त सन्ति ।	१८ वार सात हैं ।
१९ रविः १, सोमः २ भौमः ३, बुधः ४, गुरुः ५, शुक्रः ६, शनिश्च ७ ।	१९ रवि १, सोम २ भौम ३, बुध ४, बृहस्पति ५, शुक्र ६ और शनि (वार) ७ ।
२० शुक्लपक्षः, कृष्णपक्षः च इति द्विविधः पक्षः ।	२० शुक्लपक्ष और कृष्णपक्ष ऐसे दो प्रकारका पक्ष है ।

२१ उत्तरायणं दक्षिणायनं चेति द्विप्रकारकम् अयनम् ।

२२ मनुष्याणाम् एको मास एव पितॄणाम् अहोरात्रः ।

२३ तत्र कृष्णपक्षः दिवसः, शुक्लपक्षो रात्रिश्चास्ति ।

२४ एवमेव मनुष्याणाम् एकं वर्षं देवानाम् एकः अहोरात्रः भवति ।

२५ तत्र उत्तरायणं दिनं, दक्षिणायनं च रात्रिरस्ति ।

२६ तिथयः पञ्चदश सन्ति ।

२७ योगाः सप्तविंशतिः ।

२८ करणानि सप्त ।

२९ संक्रान्तयः द्वादश सन्ति, तत्र मकरसंक्रान्तिः कर्कसंक्रान्तिश्च एते द्वे अयनसंक्रान्ती ।

३० कर्कसंक्रान्तिमारभ्य आमकरसंक्रांति दक्षिणायनम्, एवं मकरसंक्रान्तिमारभ्य कर्कसंक्रमणपर्यन्तम् उत्तरायणम ।

३१ राशयः द्वादश [illegible]न, ते च इत्थं, मेषः १, [illegible]मः २, मिथुनं ३, कर्कः [illegible]ंहः ५, कन्या ६, तुला [illegible] वृश्चिकः

२१ उत्तरायण और दक्षिणायन ऐसा दो प्रकारका अयन है।

२२मनुष्योंका एक मासही पितरोंका अहोरात्र (होता है)।

२३ तिसमें कृष्णपक्ष दिन और शुक्लपक्ष रात है ।

२४ इस प्रकारही मनुष्योंका एक वर्ष देवताओंका एक अहोरात्र होता है ।

२५ तिसमें उत्तरायण दिन और दक्षिणायन रात है ।

२६ तिथियां पंद्रह हैं ।

२७ योग सत्ताईस (हैं) ।

२८ करण सात (हैं) ।

२९ संक्रांति बारह हैं, तिसमें मकरसंक्रांति और कर्कसंक्रांति ये दो अयनसंक्राति (हैं) ।

३० कर्कसंक्रांतिसे आरंभ कर मकरसंक्रांतितक दक्षिणायन (है), इस प्रकार मकरसंक्रातिसे आरंभ कर कर्कसंक्रातितक उत्तरायण(है)।

३१ राशि बारह हैं, वे ऐसे, मेष १, वृष २, मिथुन ३, कर्क ४, सिंह ५, कन्या ६, तुला ७,वृश्चिक ८, धन ९, मकर

८, धनुः ९, मकरः १०, कुम्भः ११, मीनश्च १२ ।

३२ ग्रहाः नव सन्ति, ते च रव्यादयः सप्त, राहुः केतुश्च एतौ द्वौ ।

३३ तत्र रविः बुधः शुक्रश्चैते त्रयः एकैकेन मासेन एकैकं राशिं भुञ्जन्ति ।

३४ गुरुः एकाब्देन एकं राशिं भुंक्ते ।

३५ भौमः सार्धमासेन एकं राशिं भुंक्ते ।

३६ इन्दुः सपाददिवसद्वयेन एकं राशिं भुनक्ति ।

३७ शनैश्चरः सार्धवर्षद्वयेन एकैकं राशिम् उपभुंक्ते ।

३८ राहुकेतू सार्धाब्देन एकैकं राशिं भुंक्तः ।

३९ क्वचित्तु विंशतिमासैन उपभुंजाते इति लिखितम् ।

४० रविभौमशनिवाराः पापवाराः उक्ताः ।

४१ सोमबुधगुरुशुक्रवाराः एते शुभाः सन्ति ।

४२ रविशनिभामवारेषु इन्दुश्चुकर्मणां निषेधोऽस्ति ।

१०, कुंभ ११ और मीन १२ ऐसा इनका क्रम है ।

३२ ग्रह नौ हैं, वे तो सूर्य आदि सात और राहु केतु ये दो ।

३३ तिसमें सूर्य, बुध और शुक्र ये तीन एक एक महीनेमें एक एक राशिको भोगते हैं ।

३४ बृहस्पति एक बरसमें एक राशिको भोगता है ।

३५ मंगल डेढ महीनेमें एक राशिको भोगता है ।

३६ चांद सवा दो दिवसों (अठारह पहरों) में एक राशिको भोगता है ।

३७ शनि अढाई बरसोंमें एक एक राशिको भोगता है ।

३८ राहु (और) केतु डेढ बरसमें एक एक राशिको भोगते हैं ।

३९ कहीं बीस महीनोंमें भोगते हैं ऐसा लिखा है ।

४० रवि, मंगल (और) शनिवार पाप वार कहे हैं ।

४१ सोम, बुध, बृहस्पति (और) शुक्र ये वार शुभ हैं ।

४२ रवि शनि और मंगलवारके दिन हजामतका निषेध है ।

४३ श्मश्रुकर्माणि चतुर्थीं, षष्ठीं, अष्टमीं, नवमीं, एकादशीं, चतुर्दशीं, पूर्णिमाम् अमावास्यां च वर्जयेत् ।

४४ शनिवारे अभ्यङ्गस्नानकर्म लक्ष्मीं वर्धयति ।

४५ इति कालोपदेशः समाप्तः ।

४३ हजामतके विषें चतुर्थी, षष्ठी, अष्टमी, नवमी, एकादशी, चतुर्दशी, पूर्णिमा और अमावास्याको वर्ज करे ।

४४ शनिवारके दिन मालिस करके स्नान करना लक्ष्मीको वढाता है ।

४५ इस प्रकार कालका उपदेश समाप्त हुआ ।

गृहवृत्तोपदेशः ६.

संस्कृत.	हिंदी.
१ श्रीमन्तो जनाः गृहे सुखेन तिष्ठन्ति ।	१ श्रीमान् लोग घरमें सुखसे रहते हैं ।
२ अद्य मम भृत्यः कं ग्रामं गतः ?	२ आज मेरा चाकर किस गांवको गया ?
३ अस्मिन्नारामे तरूणां पक्वानि पर्णानि पतन्ति ।	३ इस वागमें वृक्षोंके पके हुए पत्ते गिरते हैं ।
४ आलवालान्यपि शुष्काणि सन्ति ।	४ थावलेभी सूखे हैं ।
५ परीवाहे जलस्य बिंदुरपि न दृश्यते ।	५ नहरमें पानीकी बूंदभी नहीं देखी जाती ।
६ घटीयन्त्रं कः पर्यावर्तयेत ?	६ पुरवटको कौन चलावेगा ?
७ अद्य मित्रं समागतम् अतः कारवेल्लान् पटोलानि च गृहीत्वा महानसे स्थापय ।	७ आज मित्र आया है, इसीसे कैला और परवलाको ले रसोईघरमें रख ।
८ बल्लवः संनिहितो वर्तते किम् ?	८ रसोईदार नजदीक है क्या ?

९ चुल्लीसकाशे अंगारधानिका वर्तते ।
१० सोपाने संदंशं गृहीत्वा क्रीडति बालः ।
११ गवाक्षात् मञ्चके कङ्कतं पतितम् ।
१२ शय्यायाम् उपधानं वर्तते, तत्र कंदुकं दर्पणं च निधेहि ।
१३ संपुटकं प्रतिग्राहं चात्र आनय ।
१४ व्यजनवायुना पटवासकः इतस्ततः उड्डतः ।
१५ चत्वरे मण्डपो न निर्मितः यतः पङ्को वर्तते ।
१६ दीपः आसनं चैते द्वे अप्यत्र स्तः ।
१७ अस्य वस्त्रस्य दशाः दीर्घाः सन्ति ।
१८ अस्मिन् दूष्ये जवनिकां वितानं च पश्यतु भवान् ।
१९ अयमलंकारः कस्यास्ति ?
२० ग्रैवेयकेण इयं रमणी शोभते।
२१ तरुण्याः पाणौ अङ्गुलीयकं कङ्कणानि च शोभन्त ।
२२ पादयोः नूपुरौ शोभेते ।
२३ इयं काञ्ची केन प्राहिता ?
२४ अयम् उलूखले मुसलेन तण्डुलान् अवहांत ।

९ चूल्हीके नजदीक अंगेठी है ।
१० संडसीको लेकर बालक पैडीपर खेलता है ।
११ झरोखेसे पलंगपर कंघी गिर गई ।
१२ बिछौनेपर तकिया है तहां गेंद और सीसा रख ।
१३ चौघडे और पीकदानीको यहां ला ।
१४ पंखेकी वायुसे बुकवा इधर उधर उड गया ।
१५ अंगनमें मंडप नहीं बनाया, इसी कारण कीच(हुआ)है।
१६ दीया और आसन ये दोनोंभी यहां हैं ।
१७ इस कपडेकी दशियां लंबी हैं ।
१८ इस तंबूमें परदे और चंदवेको तू देख ।
१९ यह गहना किसका है ?
२० कंठीसे यह स्त्री शोभती है।
२१ तरुण स्त्रीके हाथमें अंगूठी आर कंकण शोभते हैं ।
२२ पैरामें पायजेब शोभते हैं ।
२३ यह करधनी किसने भेजी है?
२४ यह ओखलीमें मूसलसे चांवलोंको कूटता है ।

२५ भ्राष्ट्रे भर्जिताः चणकाः स्वादिष्ठाः भवन्ति ।

२६ शरावोपरि ऋजीषं किमिति निदधासि ?

२७ कटाहं दर्व्या उत्तारय ।

२८ सर्वाणि पात्राणि अत्रैव सन्ति ।

२९ चालन्या धान्यं तुषरहितं भवति ।

३० यत्र अधिरोहिणी वर्तते तत्रैव कोणे संमार्जन्या संकरं पुञ्जीकुरु ।

३१ अपि च तं शूर्पे निधाय दूरं क्षिप ।

३२ अन्तर्द्वारे पत्रिका केन स्थापिता ?

३३ अस्मिन् वर्षे पटलं दृढं वर्तते।

३४ चन्द्रशालायां बह्व्यः वस्त्राधान्यो दृश्यन्ते ।

३५ द्वारस्य देहल्यां कपाटम् अवलंब्य तिष्ठति ।

३६ इयं वेदिका सुखावहास्ति, अत्रागम्यताम् उपविश्यतां च।

३७ सूदः ओदनं सूपं शाकं च पचति ।

३८ इति गृहवृत्तोपदेशः समाप्तः।

२५ खपरीमें भूंजे हुए चने मीठे होते हैं।

२६ सरवेके ऊपर तावेको क्यों रखता है ?

२७ कढाईको कर्छुलीसे उतार दे।

२८ सब वर्तन यहांही हैं ।

२९ चालनीसे धान भूसीसे रहित होता है ।

३० जहां सीढी है तहांही कोनेमें बढनीसे कूडेकी राशि कर ।

३१ और उसको सूपके बीच ले दूर फेंक ।

३२ खिडकीमें चिट्ठी किसने रखी है ?

३३ इस बरसमें छावना दृढ है ।

३४ माडीपर बहुत कपडे सुकानेकी लाठियां दीखती हैं ।

३५ दरवाजेके देहलपर केवाडका आलंबन कर रहता है ।

३६ यह चौतरा सुखकारक है, यहां आइये और बैठिये।

३७ रसोईदार भात दाल और तरकारीको सिझाता है ।

३८ इस प्रकार गृहवृत्तोपदेश समाप्त हुआ ।

अवतारोपदेशः ७.

संस्कृत.	हिंदी.
१ चैत्रशुक्लतृतीयायाम् अपराह्णे भगवान् नारायणः मत्स्यरूपेण अवातरत् ।	१ चैत्रशुक्लतृतीयाके दिन अपराह्णकालमें भगवान् विष्णु मछलीके रूपसे अवतारता भया ।
२ ततः सुरद्वेषिणं शंखासुरं हत्वा सरित्पतेः वेदान् उद्धृतवान् ।	२ पीछे देवोंके शत्रु शंखासुरको मार समुद्रसे वेदोंका उद्धार करता भया ।
३ वैशाखपूर्णिमायां सायं कूर्मावतारो बभूव ।	३ वैशाखपूर्णिमाके दिन सायंकालमें कूर्मावतार भया ।
४ सच देवदैत्यानां सागरमन्थने प्रवृत्ते अधोधो गच्छन्तं मन्दराचलं मन्थानं स्वपृष्ठे दधार ।	४ वह (कछुवा) देवदैत्योंका समुद्रमंथन प्रवृत्त होनेपर नीचे नीचे जाते हुए मंदराचलरूपी रईको अपने पृष्टपर धरता भया ।
५ भाद्रपदस्य शुक्लतृतीयायाम् अपराह्णे वराहरूपोऽभूत् ।	५ भाद्रपदकी शुक्लतृतीयाके दिन अपराह्णकालमें सूकररूपी हुआ ।
६ तेन हिरण्याक्षनामानं दैत्यं मारयित्वा जले निमग्नायाः मेदिन्याः स्वदंष्ट्रया उद्धारोऽकारि ।	६ उस(सूकर) ने हिरण्याक्ष नाम दैत्यको मार जलमें डूबी हुई पृथ्वीका अपने डाढसे उद्धार किया ।
७ वैशाखशुक्लचतुर्दश्यां सायं नृसिंहः स्तम्भात् प्रादुरभूत् ।	७ वैशाखशुक्लचतुर्दशीके दिन संध्याकालमें नारसिंह खंभसे प्रकट भया ।
८ सतु तत्काल एव स्वनखैः	८ वह तो तत्कालही अपने

हिरण्यकशिपुं विदार्य आत्मभक्तस्य प्रह्लादस्य रक्षणमकार्षीत् ।

९ भाद्रपदशुक्लद्वादश्यां मध्याह्ने कश्यपात् अदित्यां वामनः प्रकटीबभूव ।

१० सच इन्द्ररक्षायै बलिसन्निधिं गत्वा त्रिपदां भूमिम् अयाचत ।

११ पश्चात् द्वाभ्यां पादाभ्यां सर्वान् लोकान्व्याप्य तृतीयं पदं बलेः शिरसि निधाय तं सुतले प्रेषयामास ।

१२ वैशाखशुक्लतृतीयायां मध्याह्ने जमदग्निपुत्रः परशुरामः रेणुकायाम् उदपद्यत ।

१३ सतु पितृहिंसाकारिणं हैहयाधिपम् अहन् ।

१४ तेन च क्रोधवशात एकविंशतिवारं धरणिः निःक्षत्रिया कृता ।

१५ चैत्रशुक्लनवम्यां मध्याह्ने दशरथात् कौशल्यायां श्रीरामचंद्रः आविर्बभूव ।

नखोंसे हिरण्यकशिपुको फाडकर अपने भक्त प्रह्लादका रक्षण करता भया ।

९ भाद्रपदशुक्लद्वादशीके दिन मध्याह्नसमय कश्यप [ऋषि] से अदितिमें वामन प्रकट भया ।

१० वह इंद्रके रक्षणके वास्ते बलिके पास जा तीन पांव भूमिको मांगता भया ।

११ पीछे दो पैरोंसे सब लोकोंको व्यापकर तीसरे पैरको बलिके शिरपर रखके उसको सुतल [लोक] में भेजता भया ।

१२ वैशाखशुक्लतृतीयाके दिन मध्याह्नसमय जमदग्निऋषिका पुत्र परशुराम रेणुकामें उत्पन्न भया ।

१३ वह तो पिताकी हिंसा करनेवाले सहस्रार्जुनको मारता भया ।

१४ और उसने क्रोधके आधीन होनेसे इक्कीस वार पृथिवी क्षत्रियरहित की ।

१५ चैत्रशुक्लनवमीके दिन मध्याह्नसमय दशरथसे कौशल्यामें श्रीरामचंद्र प्रकट भया ।

१६ तस्य भरतः लक्ष्मणः शत्रुघ्नः इति त्रयोऽनुजाः बभूवुः ।

१६ उस (राम) के भरत, लक्ष्मण, शत्रुघ्न ऐसे तीन छोटे भाई हुए ।

१७ सच पितुराज्ञया सीतालक्ष्मणाभ्यां साकं वनमयात् ।

१७ वह (राम) पिताकी आज्ञासे सीता और लक्ष्मणके साहित अरण्यको गया ।

१८ तत्र रावणः सीतां जहारः ।

१८ तहां रावण सीताजीको हरता भया ।

१९ अथ रामचन्द्रस्य सुग्रीवः मित्रम् अभूत् ।

१९ अनंतर सुग्रीव रामचंद्रजीका मित्र भया ।

२० ततः वालिनं निहत्य वानरराज्ये सुग्रीवम् अभ्यषिञ्चत् ।

२० पीछे वालिको मार वानरोंके राज्यमें सुग्रीवको अभिषेक करता भया ।

२१ तदनन्तरं हनुमता सीताशुद्धिं कारयित्वा वानरसैन्येन सार्धं लङ्कां गत्वा रावणकुम्भकर्णौ अवधीत्, लक्ष्मणस्त्विन्द्रजितं मारयामास ।

२१ इसके पीछे हनुमान्से सीताका शोध कराके वानरसेनाके साथ लंकाको जा रावण और कुंभकर्णको मारता भया और लक्ष्मण इंद्रजितको मारता भया ।

२२ समनन्तरं सीतया सह अयोध्यामागत्य दशसहस्राणि वर्षाणि धर्मेण प्रजापालनं कृतवान् ।

२२ अनंतर सीताजीके सहित अयोध्याको आकर दश हजार वर्षोंतक धर्मसे प्रजापालन किया ।

२३ श्रावणकृष्णाष्टम्यां निशीथे वसुदेवाद्देवक्यां श्रीकृष्णः प्रादुर्भूतः ।

२३ श्रावणकृष्ण अष्टमीके दिन आधी रातमें वसुदेवसे देवकीमें श्रीकृष्ण प्रकट हुआ ।

२४ श्रावणकृष्णपक्षमेव भाद्र-

२४ श्रावणकृष्णपक्षकोही भाद्र-

पदकृष्णपक्ष इत्युत्तरदेश-स्थाः वदन्ति ।

२५ तेन च कंसं हत्वा कारागृहात् देवकीवसुदेवौ मौचितौ ।

२६ एवं बहून् दुष्टान् हत्वा साधुपालनम् व्यरचि ।

२७ आश्विनशुक्लदशम्यां सायं बुद्धावतारोऽभूत् ।

२८ सच असुरान् अधर्मम् उपदिश्य नरके पातयामास ।

२९ कलियुगान्ते आश्विनशुक्लषष्ठ्यां सायं कल्किः भविष्यति ।

३० स च अधार्मिकान् हत्वा कृतयुगं स्थापयिष्यति ।

३१ रामसाहाय्याय रुद्रावतारः मारुतिरभूत् ।

३२ एतासु तिथिषु कल्याणेच्छुभिः उपोषणं कार्यम् ।

३३ यस्मिन् काले अवतारः अभूत् तत्कालव्यापिनी तिथिर्व्रताय ग्राह्या ।

पदकृष्णपक्ष ऐसा उत्तरदेशमें रहनेवाले कहते हैं ।

२५ उस (कृष्ण) ने कंसको मारकर बंदीखानेसे देवकी और वसुदेव मुक्त किये ।

२६ इस प्रकार बहुत दुष्टोंको मार साधुओंका पालन किया ।

२७ आश्विनशुक्लदशमीके दिन सायंकालमें बुद्धावतार भया।

२८ वह असुरोंको अधर्मका उपदेश कर नरकमें पटकता भया ।

२९ कलियुगके अंतमें आश्विनशुक्लषष्ठीके दिन सायंकालमें कल्कि होगा ।

३० वह अधर्म करनेवालोंको मार कृतयुगकी स्थापना करेगा ।

३१ रामजीकी सहायताके अर्थ रुद्रका अवतार हनुमान् भया ।

३२ इन तिथियोंमें कल्याण चाहनेवालोंने उपवास करना ।

३३ जिस कालमें अवतार भया उस कालको व्यापनेवाली तिथि व्रतके लिये लेनी चाहिये ।

३४ एकादश रुद्राः श्रीशिवस्य अवताराः सन्ति ।	३४ ग्यारह रुद्र श्रीशिवजीके अवतार हैं ।
३५ इत्यवतारोपदेशः समाप्तः ।	३५ इस प्रकार अवतारोपदेश समाप्त ।

तरण्यवतारोपदेशः ८.

संस्कृत.	हिंदी.
१ सुहृदा सार्धम् अनलतरणिं प्रेक्षितुं गच्छामि ।	१ मित्रके साथ अगिनबोटको देखनेके लिये जाता हूं ।
२ अस्यां तरण्यां नौकादण्डं गृहीत्वा कर्णधारः किं करोति ?	२ इस नावपर डांडको ले पतवार पकडनेवाला क्या करता है ?
३ अरित्रं विना नौका आयत्ता न भवति ।	३ पतवारके विना नाव आधीन नहीं होती ।
४ अस्यां सांयात्रिकः पोतवाहैः सह किमपि करोति ।	४ इसमें जहाजी खेवैयोंके साथ कुछभी करता है ।
५ आवर्ते प्राप्तः प्लवः प्रायः तत्रैव निमज्जति ।	५ भंवरमें प्राप्त हुआ बेडा बहुताई तहांही डूब जाता है।
६ अये अनलनौकायां गुणवृक्षकस्य किं प्रयोजनम् ?	६ अरे ! अगिनबोटमें मस्तूलका क्या कारण [है] ?
७ अयमत्र धीवरः जालेन झषान् निगृह्णाति ।	७ यह मलाह यहां जालसे मछलियोंको पकडता है ।
८ वर्षाकाले लघ्वीं नौकां सागरे न संचारयन्ति ।	८ वर्षाके समय छोटी नावको समुद्रमें नहीं चलाते ।
९ तस्मिन् काले अतीव बृहती लहरी उद्गच्छति ।	९ तिस कालमें बहुतही बडी लहर उछलती है ।

१० अनलतरणिस्तु सर्वदा संचरति, आंग्लदेशमपि गच्छति ।

११ तस्याः आतरस्तु महान् वर्तते ।

१२ अग्निरथावतारोपि अत्र वर्तते ।

१३ तन्त्रीयन्त्रेण वार्ता द्रुतं ज्ञायते ।

१४ अग्निरथस्येदं बाष्पयन्त्रमस्ति ।

१५ किम् आपणे जिगमिषास्ति ? अयं संनिहित एव विद्यते ।

१६ समन्ततः पण्यवीथिकाः प्रेक्षस्व ।

१७ इयं पात्राणां पण्यशाला अस्ति ।

१८ क्रय्याधानिकायां महाव्यापारो भवति ।

१९ अत्र पणं कलां पादम् अर्धरूप्यं रूप्यं वा गृहीत्वा न किमपि विक्रीणन्ति ।

२० तर्हि अत्र कुडवः, प्रस्थः, आढकः इत्यादीनि परिमाणानि किमर्थं स्थापितानि ?

२१ स्यात् किमपि अन्यत् कारणम् ।

१० अगिनबोट तो सब काल चलती है, इग्लंडकोभी जाती है ।

११ उसका खेवा तो वडा है ।

१२ स्टेशनभी (रेलगड्डीका ठाना) यहां है ।

१३ तारायंत्रसे वार्ता शीघ्र जानी जाती है ।

१४ यह रेलगड्डीका इंजन (दमकल) है ।

१५ क्यों बजारमें जानेकी इच्छा है ? यह नजदीकही है ।

१६ चारों ओर दूकानोंकी पांतियोंको देख ।

१७ यह बर्तनोंका दुकान है ।

१८ वखारमें थोक व्यापार (लेन-देन) होता है ।

१९ यहां पैसा, आना, चौअन्नी अठन्नी या रुपैयाको ले कुछभी नहीं बेचते हैं ।

२० तो यहां पावसेर, सेर, पायली इत्यादिक माप किस कारण रक्खे हैं ?

२१ कुछभी दूसरा कारण होगा ।

२२ इदं पत्रिकालयं नवीनं निबद्धम् ।	२२ यह डांकघर (पोस्ट) नया बांधा है ।
२३ श्वोपि अत्र व्यायामाय आगमिष्यामि ।	२३ कलभी यहां व्यायामके वास्ते आऊंगा ।
२४ इति तरण्यवतारोपदेशः समाप्तः अभूत् ।	२४ इस प्रकार बंदरका उपदेश समाप्त हुआ ।

स्वर्गोपदेशः ९.

संस्कृत.	हिंदी.
१ स्वर्गे देवाः वसन्ति ।	१ देव स्वर्गमें रहते हैं ।
२ तेषां राजा इन्द्रः अस्ति ।	२ उनका राजा इंद्र है ।
३ पुण्यवंतो जनाः स्वर्गं गच्छन्ति, तत्र पुण्यबलात् नानाविधं सुखम् उपभुञ्जंते, पुण्यक्षयानन्तरं पुनः मर्त्यलोकं प्राप्नुवन्ति ।	३ पुण्यवान् लोग स्वर्गको जाते हैं, तहां पुण्यके बलसे बहुत प्रकारके सुखको भोगते हैं, पुण्यका नाश होनेपर फिर मृत्युलोकको प्राप्त होते हैं ।
४ स्वर्गप्रदायकं मुख्यं साधनं यज्ञः अस्ति ।	४ स्वर्ग देनेवाला प्रधान (बडा) साधन यज्ञ है ।
५ सत्यलोके चतुराननः तिष्ठति, सच इदं सर्वं जगत् सृजाति, तं रजोगुणिनं विद्वांसः वदन्ति, तस्य भार्या सावित्री, पुत्रास्तु नारदाद्याः बहवः सन्ति ।	५ सत्यलोकमें ब्रह्मदेव रहता है, वह इस सब जगत्को रचता है, उसको विद्वान् लोग रजोगुणी कहते हैं, उसकी भार्या सावित्री [है], नारद आदि पुत्र तो बहुत हैं ।
६ वैकुण्ठपुरे नारायणः निवसति, सच सर्वं जगत् रक्षति, तं सत्त्वगुणिनं पण्डिताः	६ वैकुंठनामक पुरमें विष्णु रहता है, वह सब जगत्का पालन करता है, पंडित

कथयन्ति, तस्य भार्या लक्ष्मीः, पुत्रस्तु ब्रह्मा प्रसिद्धोऽस्ति, तं विष्णुः स्वस्य नाभिकमले उत्पादयामास ।

७ शंकरः कैलासम् अध्यास्ते, सच प्रलयसमये सर्वान् लोकान् संहरति, सः तमोगुणी इति ज्ञानिनः ब्रुवन्ति, तस्य भार्या भवानी, गणेशः स्कंदश्च एतौ तस्य पुत्रौ ।

८ गजाननः अन्तरायान् नाशयति, अत एव सर्वकार्यारम्भे तं स्मरन्ति पूजयन्ति च ।

९ गुहः देवानां सेनानायकः अस्ति, सः तारकासुरं जितवान् ।

१० वाचस्पतिः अमराणां पुरोहितः ।

११ विबुधाः अमृतं पिबन्ति ।

१२ निर्जराः अप्सरोभिः साकं नन्दने क्रीडन्ति ।

१३ सुरा अभीष्टं कल्पतरोः प्राप्नुवन्ति, यतः सः इच्छितपदार्थानां दाता वर्तते ।

लोग उसको सत्वगुणी कहते हैं, उसकी भार्या लक्ष्मी [है], पुत्र तो ब्रह्मदेव विख्यात है, उस [ब्रह्मा] को विष्णु अपने नाभिकमलमें उत्पन्न करता भया ।

७ महादेव कैलासपर रहता है, वह प्रलयकालमें सब लोगोंको मारता है, वह तमोगुणी इस प्रकार ज्ञानी कहते हैं, उसकी भार्या पार्वती [है], गणपति और कार्तिकस्वामी ये (दो) उसके पुत्र(हैं)।

८ गणपति विघ्नोंको नाशता है, इसीसे सब कर्मोंके आरंभमें उसको स्मरते हैं और पूजते हैं ।

९ कार्तिकस्वामी देवोंका सेनापति है, वह तारकासुरको जीतता भया ।

१० बृहस्पति देवोंका उपाध्याय (है) ।

११ देव अमृतको पीते हैं ।

१२ देव अप्सराओंके साथ नंदन (वन) में क्रीडा करते हैं।

१३ देव इच्छित(वस्तु)को कल्पवृक्षसे पाते हैं. क्योंकि वह इच्छित वस्तुओंका दाता है।

१४ यदा देवाः क्षीराम्बुधिं मन्थुः तदा तस्माद्बहूनि रत्नान्युदपद्यन्त ।

१४ जब देव क्षीरसमुद्रको मंथन करते भये, तब उससे बहुत रत्नें उत्पन्न भईं ।

१५ मन्थनकाले मन्दराचलः मन्थानः अभूत् ।

१५ मन्थनके समय मन्दर पर्वत रई हुआ ।

१६ वासुकिः रज्जुः बभूव ।

१६ वासुकी (नाग) रस्सी भया ।

१७ असुराः अपि मन्थनकर्मणि सहायाः अभूवन् ।

१७ दैत्यभी मंथनकर्ममें सहाय होते भये ।

१८ देवाः एव असुरान् मोहयित्वा सर्वाणि रत्नानि अगृह्णन् ।

१८ देवहीं दैत्योंको मोहित कर सब रत्नोंको लेते भये ।

१९ दैत्यास्तु सुराम् एव लेभिरे।

१९ दैत्य तो मदिराकोही प्राप्त होते भये ।

२० प्राप्तव्यमर्थं लभते मनुष्यो देवो न जानाति कुतो मनुष्यः ?

२० अवश्य मिलनेवाले द्रव्यको मनुष्य प्राप्त होता है.(उसको) देव (भी) नहीं जानता, मनुष्य कहांसे ?

२१ प्रारब्धकर्मणां भोगादेव क्षयः संपद्यते ।

२१ किये हुए कर्मोंका नाश भोगसेही होता है ।

२२ अग्निहोत्रं जुहुयात् स्वर्गकामः ।

२२ स्वर्गेच्छावाला अग्निहोत्रको हवन करे ।

२३ पातकी निरयं गच्छति ।

२३ पापी नरकको जाता है ।

२४ वैष्णवाः विष्णुलोकं यान्ति ।

२४ विष्णुभक्त विष्णुके लोकको जाते हैं ।

२५ शैवाः शिवलोकं प्राप्नुवन्ति ।

२५ शिवभक्त शिवके लोकको प्राप्त होते हैं ।

२६ गाणपत्याः गणपतेपुरमध्यासते ।

२६ गणेशभक्त गणेशके नगरमें रहते हैं ।

२७ सौराः सूर्यपुरीम् अधितिष्ठन्ति ।

२८ शाक्ताः देवीसंनिधिमधिगच्छन्ति ।

२९ सुखस्याऽनन्तरं दुःखं, दुःखस्याऽनन्तरं सुखम् ।

३० परब्रह्मोपासकाः तु संसारबन्धं छित्त्वा मोक्षं लभन्ते ।

३१ आत्मज्ञानं विना ब्रह्मोपासना न भवति ।

३२ मोक्षं प्राप्य पुनः संसारसमुद्रं न च आगच्छति ।

३३ इदम् अन्यच्च सर्वं पुराणश्रवणेन ज्ञायते ।

३४ विष्णुः मधुकैटभौ जघान ।

३५ महादेवः त्रिपुरासुरम् अजयत् ।

३६ इन्द्रेण वृत्रासुरः अहन्यत ।

३७ शक्तिः महिषासुरम् अमर्दयत् ।

३८ एवं देवैः दुष्टाः असुराः अभिहन्यन्ते ।

३९ इति स्वर्गोपदेशः संपूर्णः अभूत् ।

२७ सूर्यभक्त सूर्यके पुरमें रहते हैं ।

२८ देवीभक्त देवीके पास जाते हैं ।

२९ सुखके पीछे दुःख, दुःखके पीछे सुख ।

३० परब्रह्मकी उपासना करनेवाले तो संसाररूपी बन्धनको तोड मुक्तिको पाते हैं ।

३१ आत्माका ज्ञान न होनेसे ब्रह्मकी उपासना नहीं होती।

३२ मुक्तिको प्राप्त होके फिर संसाररूपी समुद्रमें नहीं आता ।

३३ यह और दूसरा सब पुराणके सुननेसे जाना जाता है ।

३४ विष्णु मधुकैटभोंको मारता भया ।

३५ शिव त्रिपुरासुरको जीतता भया ।

३६ इंद्रने वृत्रासुर मारा ।

३७ देवी महिषासुरको मारती भई ।

३८ इस प्रकार देवोंसे दुष्ट दैत्य मारे जाते हैं ।

३९ ऐसा स्वर्गका उपदेश समाप्त हुआ ।

सुभाषितोपदेशः १०.

संस्कृत.	हिंदी.
१ अजरामरवत् प्राज्ञो विद्यामर्थं च साधयेत् । गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ।	१ अजर-अमरकी नाईं विद्वान् विद्या और द्रव्यको विचारे। [व] मृत्युने बालोंमें पकड लिये हुएकी नाईं धर्मको आचरे ।
२ विद्या शस्त्रस्य शास्त्रस्य द्वे विद्ये प्रतिपत्तये । आद्या हास्याय वृद्धत्वे द्वितीयाऽऽद्रियते सदा ।	२ प्रतिष्ठाके लिये शस्त्रकी [और] शास्त्रकी विद्या [ये] दो विद्यायें हैं। पहिली बूढेपनमें हास्यके लिये [होती है] दूसरी निरंतर [आदमीका] आदर करती है ।
३ अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् । सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ।	३ बहुत संदेहोंका नाशनेवाला, अदृश्य पदार्थका दिखानेवाला, सबका नेत्र [ऐसा] शास्त्र जिसके नहीं, सो अंधही [है]।
४ अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च । वश्यश्च पुत्रोऽर्थकरी च विद्या षड् जीवलोकस्य सुखानि राजन् ।	४ हे राजन् ! धनप्राप्ति, सदा अरोगिपन, सुन्दर और हित बोलनेवाली स्त्री, आधीन पुत्र और धन पैदा करनेवाली विद्या (ये) मनुष्यलोकके छः सुख हैं ।
५ ऋणकर्ता पिता शत्रुर्माता च व्यभिचारिणी । भार्या	५ कर्ज करनेवाला पिता वैरी [है], अन्य पुरुषका संग

रूपवती शत्रुः पुत्रः शत्रुरपण्डितः ।

करनेवाली माता वैरी (है), रूपवाली स्त्री वैरी (है) और मूर्ख पुत्र वैरी (है)।

६ अनभ्यासे विषं विद्या अजीर्णे भोजनं विषम् । विषं सभा दरिद्रस्य वृद्धस्य तरुणी विषम् ।

६ अभ्यास न करनेपर विद्या विष (जहर है), अजीर्ण होनेपर भोजन विष (है)। दरिद्रको सभा विष (है, तथा) बूढेको तरुण स्त्री विष (है)।

७ गुणवान् पूज्यते नरः ।

७ गुणवान् आदमी पूजा जाता है ।

८ निर्गुणः किं करिष्यति ?

८ निर्गुणी क्या करेगा ?

९ धर्मेण हीनाः पशुभिः समानाः ।

९ धर्मसे रहित (पुरुष) पशुके समान (हैं)।

१० अवश्यंभाविनो भावा भवन्ति महतामपि ।

१० अवश्य होनेवाली चेष्टायें बडोंकीभी होती हैं ।

११ यद्भावि न तद्भावि, भावि चेन्न तदन्यथा ।

११ जो न होनेवाला वह नहीं होता, (जो) होनेवाला हो सो विपरीत नहीं (होता)।

१२ न दैवमपि संचिन्त्य त्यजेदुद्योगमात्मनः । अनुद्योगेन तैलानि तिलेभ्यो नाप्तुमर्हति ।

१२ प्रारब्धको सोच अपने उद्योगको न छोडे । (क्योंकि), विना यत्नके तिलोंसे तेलको पानेके लिये समर्थ नहीं होता ।

१३ उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः ।

१३ उद्योगी सिंहसमान पराक्रमी पुरुषको लक्ष्मी प्राप्त होती है ।

१४ यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ?

१५ उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः । न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ।

१६ अनिष्टादिष्टलाभेऽपि न गतिर्जायते शुभा । यत्रास्ते विषसंसर्गोऽमृतं तदपि मृत्यवे ।

१७ नदीनां शस्त्रपाणीनां नाखिनां शृङ्गिणां तथा । विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ।

१८ लोभः पापस्य कारणम् ।

१९ अल्पानामपि वस्तूनां संहतिः कार्यसाधिका । तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ।

२० आपदर्थे धनं रक्षेत् दारान् रक्षेद्धनैरपि । आत्मानं सततं रक्षेद्दारैरपि धनैरपि ।

१४ यत्न करनेपर जो सिद्ध न हो (तो) इसमें क्या दोष?

१५ उद्योगसेही काम सिद्ध होते हैं, इच्छाओंसे नहीं । सोये हुए सिंहके मुँहमें हरिण नहीं घुसते ।

१६ खोटेसे इच्छित (वस्तु) मिलनेपरभी अच्छी दशा नहीं होती । जहां विषका संबंध है वह अमृतभी मृत्युके लिये (है) ।

१७ नदियोंका, जिनके हाथमें शस्त्र है उनका, नखवालोंका, सींगवालोंका, तैसा स्त्रियोंका और राजकुलका विश्वास करना योग्य नहीं ।

१८ लोभ पापका कारण (है) ।

१९ तुच्छ वस्तुओंका समूहभी कार्य सिद्ध करनेवाला (होता है) । रस्सीपनको प्राप्त हुए तिनकोंसे मतवाले हाथी बांधे जाते हैं ।

२० आपत्तिके लिये धनकी रक्षा करे, धनसेभी स्त्रियोंकी रक्षा करे, स्त्रियोंसेभी (और) धनोंसेभी सदा अपनी रक्षा करे ।

२१ धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् ।

२२ विधिरहो बलवानिति मे मतिः ।

२३ अज्ञातकुलशीलस्य वासो देयो न कस्यचित् ।

२४ यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान् गुणज्ञः । स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ते ।

२५ हनुमानब्धिमतरत्, दुष्करं किं महात्मनाम् ?

२६ बहुरत्ना वसुंधरा ।

२७ गजा यत्र न गण्यन्ते मशकानां तु का कथा ?

२८ विद्वानेव हि जानाति विद्वज्जनपरिश्रमम् । नहि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम् ।

२९ अन्धेषु काणो राजा हि ।

३० यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।

२१ ज्ञानी पुरुष पराये अर्थ धन और जीवन छोडे ।

२२ अहो, भाग्य बलवान्(-है), ऐसी मेरी बुद्धि है ।

२३ जिसका कुल, स्वभाव न जाना (ऐसे) किसीकोभी स्थान देना योग्य नहीं ।

२४ जिसके द्रव्य है सो मनुष्य कुलीन, सो पंडित, सो शास्त्री, गुणोंका परीक्षक, सोही वाक्चतुर और सो देखने योग्य (है, क्योंकि) सब (अच्छे) गुण सुवर्णको आश्रयते हैं ।

२५ हनुमान्जी समुद्रको तरता भया, महात्माओंको क्या दुष्कर (है) ?

२६ बहुत रत्नोंवाली पृथ्वी(है)।

२७ जहां हाथी नहीं गिने जाते, (वहां) झींगरोंकी क्या बात ?

२८ विद्वान्ही विद्वज्जनोंके श्रमको जानता है । वांझ बडे प्रसूतिदुःखको नहीं जानती ।

२९ अंधोंमें कानाही राजा ।

३० जिसके स्वयं बुद्धि नहीं है, उसे शास्त्र क्या करेगा ?

लोचनाभ्यां विहीनस्य दर्पणं किं करिष्यति ।

२१ प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ।

२२ इति सुभाषितोपदेशः समाप्तोऽभूत् ।

आंखोंसे रहित (आदमी) को दर्पण क्या करेगा ?

२१ कीचके धोनेकी अपेक्षा दूरसे न छूनाही श्रेष्ठ है ।

२२ इस प्रकार सुभाषितका उपदेश समाप्त हुआ ।

कथोपदेशः ११.

संस्कृत.

